Civil Services (Main)
Examination, 2026

**वियोज्यम् DETACHABLE**

# संस्कृतम् (प्रथमं प्रश्नपत्रम्)
# (साहित्यम्)

# SANSKRIT (Paper I)
# (LITERATURE)

*समयः : होरात्रयम् (घंटा-त्रयम्)*
*Time Allowed : Three Hours*

*पूर्णाङ्काः : 250*
*Maximum Marks : 250*

## प्रश्नपत्र-सम्पृक्ताः विशेषनिर्देशाः

**कृपया प्रश्नोत्तरलेखनपूर्वं निम्नलिखितनिर्देशाः सावधानतया पठनीयाः**

**खंडद्वयेषु** विभाजिताः **अष्ट** प्रश्नाः ।

परीक्षार्थिभिः **पञ्चैव** प्रश्नाः समाधेयाः ।

प्रश्नसंख्या **1** तथा **5** अनिवार्ये । शेषप्रश्नेषु **त्रयाणां** समाधानं प्रदेयम् । तत्र प्रत्येकखण्डात् **एकम्** अवश्यं करणीयम् ।

प्रत्येकप्रश्नस्य तस्य भागस्य च अङ्काः तत्रैव निर्दिष्टाः ।

प्रश्नसंख्या **1, 5** तथा **8 संस्कृतभाषयैव** समाधेयाः । शेष-प्रश्नानां समाधानं यथेच्छं संस्कृतभाषया अथवा **प्रवेशपत्रे** स्वीकृत-भाषया करणीयम् । संस्कृतभाषा देवनागरी-लिप्या एव लेखनीया ।

प्रश्नोत्तरस्य शब्दसीमा यदि निर्धारिता तर्हि सा सीमा पालनीया ।

प्रश्नक्रमानुसारमेव क्रमेण प्रश्नोत्तराणि प्रदेयानि । यदि उत्तरपुस्तिकायां किमपि पृष्ठं रिक्तं (अलिखितं) स्यात् तर्हि तत्र स्पष्टरूपेण अनुलोम-विलोमरेखा (×) विधेया । अंशतः प्रदत्तं प्रश्नोत्तरमपि संपूर्णप्रश्नोत्तरवत् परिगणितं भविष्यति ।

## QUESTION PAPER SPECIFIC INSTRUCTIONS

**Please read each of the following instructions carefully before attempting questions :**

There are **EIGHT** questions divided in **TWO Sections.**

Candidate has to attempt **FIVE** questions in all.

Question Nos. **1** and **5** are compulsory and out of the remaining, **THREE** are to be attempted choosing at least **ONE** question from each Section.

The number of marks carried by a question/part is indicated against it.

Question Nos. **1, 5** and **8** must be answered in **SANSKRIT** and the remaining questions must be answered either in **SANSKRIT** or in the medium authorized in the Admission Certificate. Answer written in **SANSKRIT** must be in Devanagari script.

Word limit in questions, wherever specified, should be adhered to.

Attempts of questions shall be counted in sequential order. Unless struck off, attempt of a question shall be counted even if attempted partly. Any page or portion of the page left blank in the Question-cum-Answer Booklet must be clearly struck off.

## खण्ड ‘A’ SECTION ‘A’

**1.**(a) अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः :
Answer all of the following (to be written in Sanskrit language) : 1×10=10

(i) ‘यय्’-प्रत्याहारस्य वर्णाः लेख्याः ।

(ii) आभ्यन्तरप्रयत्नाः कति सन्ति ? तेषां नामानि लेखनीयानि ।

(iii) क्, झ्, ड्, थ्, व् - इत्येतेषां वर्णानाम् उच्चारणस्थानानि विलेख्यानि ।

(iv) ‘संहिता’-सञ्ज्ञाविधायकं सूत्रं किमस्ति ?

(v) बालकैः अपूपाः भुज्यन्ते - इत्यत्र वाच्यपरिवर्तनं क्रियताम् ।

(vi) ‘शिवेहि’ इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः कार्यः ।

(vii) ‘वाग्घरिः’ इत्यत्र सूत्रोल्लेखपूर्वकं सन्धिविच्छेदः करणीयः ।

(viii) ‘अनुरूपम्’ इत्यत्र विग्रहपूर्वकं समासनाम लेख्यम् ।

(ix) ‘प्राप्ता विद्या यया’ इत्यत्र समासनामोल्लेखपूर्वकं समासो विधेयः ।

(x) ‘गुरुः शिष्यान् पाठयति’ इत्यत्र वाच्यपरिवर्तनं विधीयताम् ।

**1.**(b) अधोनिर्दिष्टानां रेखाङ्कितपदानां सूत्रोल्लेखपूर्वकं विभक्तेरुपपत्तिः संस्कृतेन निरूपणीया : 2×5=10

(i) <u>द्रोणो</u> व्रीहिः ।

(ii) <u>क्रोशं</u> कुटिला नदी ।

(iii) <u>बालकेभ्यः</u> क्रीडा रोचते ।

(iv) <u>आचार्यात्</u> छात्रः शास्त्रम् अधीते ।

(v) <u>कवीनां</u> श्रेष्ठः कालिदासः ।

1.(c) अधोलिखितसूत्राणाम् अर्थः सोदाहरणं 3-4 पंक्तिभिः लेख्यः - 2×5=10

(i) आदिरन्त्येन सहेता ।

(ii) वृद्धिरेचि ।

(iii) अधिशीङ्स्थासां कर्म ।

(iv) तृतीया तत्कृतार्थेन गुणवचनेन ।

(v) अजाद्यदन्तम् ।

1.(d) गौणकर्मणः मुख्यकर्मणश्च भिन्नता सोदाहरणं प्रदर्शनीया । 10

1.(e) 'संख्या वंश्येन' इति सूत्रं सोदाहरणं व्याख्येयम् । 10

2. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50
Answer all of the following questions :

2.(a) वैदिकसंस्कृतभाषायां सुबन्तपदप्रयोगवैविध्यं प्रतिपाद्यम् । 20
Explain the diversity in the usage of Subanta (nominal) forms in Vedic Sanskrit.

2.(b) लौकिकसंस्कृतभाषायाः स्वरूपवैशिष्ट्यं निरूपणीयम् । 15
Explain the distinctive features of the structure of Classical Sanskrit language.

2.(c) लौकिकसंस्कृतभाषायां ध्वनिविज्ञानस्य महिमा वर्णनीयः । 15
Describe the significance of phonetics in Classical Sanskrit language.

3. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 15+10+15+10=50
Answer all the following questions :

3.(a) 'रम्या रामायणी कथा' इत्युक्तिः समीक्षणीया । 15
Critically examine the maxim – 'रम्या रामायणी कथा' ।

3.(b) 'काव्यस्यात्मा ध्वनि'रिति वचः सोदाहरणं विवेचनीयम् । 10
Explain with suitable examples, the statement – 'काव्यस्यात्मा ध्वनि'रिति ।

3.(c) 'कारुण्यं भवभूतिरेव तनुते' इति सूक्तिः सन्निदर्शनेन विमर्शनीया । 15
Discuss the maxim – 'कारुण्यं भवभूतिरेव तनुते', with appropriate examples.

3.(d) चम्पूकाव्यस्य विकासक्रमः निरूपणीयः । 10

Explain the course of development of Champū literature.

4. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

Answer all the following questions :

4.(a) संस्कृतमहाकाव्यानाम् उद्भवः विकासश्च समुपवर्ण्यताम् । 20

Describe the origin and development of Sanskrit Mahākāvyas (epic poems).

4.(b) 'यन्न भारते तन्न भारते' इत्युक्तिः साधु विविच्यताम् । 15

Properly explain the statement – 'यन्न भारते तन्न भारते' ।

4.(c) संस्कृतकाव्यशास्त्रे प्रतिपादितं काव्यलक्षणं समीक्ष्यताम् । 15

Critically examine the definition of poetry (Kāvya-lakṣaṇa) as propounded in Sanskrit poetics.

## खण्ड 'B' SECTION 'B'

5. अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः : 10×5=50

Answer all of the following (to be written in Sanskrit language) :

5.(a) संगीतकलायां प्राच्यभारतस्य अवदानं परिशील्यताम् । 10

5.(b) संस्कारेषु विवाहोत्सवस्य महत्त्वम् उपवर्ण्यताम् । 10

5.(c) पुरुषार्थचतुष्टयस्य विवेचना क्रियताम् । 10

5.(d) चिकित्साशास्त्रे आचार्यचरकस्य समवदानं समुपवर्ण्यताम् । 10

5.(e) 'धन्यो गृहस्थाश्रमः' इत्युक्तिमाश्रित्य गृहस्थाश्रमस्य महत्ता समुपपादनीया । 10

6. अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

Answer all the following questions :

6.(a) सांख्यदर्शनानुसारं मूलप्रकृतेः स्वरूपं वैशिष्ट्यञ्च प्रतिपादनीयम् । 20

Explain the nature and distinctive characteristics of Mūla Prakṛti according to the Sāṃkhya philosophy.

**6.** (b) न्यायदर्शनानुसारं प्रमाणवैविध्यं सोदाहरणं विवेचनीयम् । 15

Explain with suitable examples, the different kinds of Pramāṇas (means of valid knowledge) according to the Nyāya philosophy.

**6.** (c) मीमांसादर्शनानुसारं गृहस्थेभ्यः पञ्चयज्ञानाम् उपयोगित्वं साधनीयम् । 15

Explain the utility of the five sacrifices (Pañca-Yajñas) for householders according to the Mīmāṃsā philosophy.

**7.** अधोलिखिताः सर्वे प्रश्नाः समाधेयाः : 20+15+15=50

Answer all the following questions :

**7.** (a) बौद्धदर्शनानुरूपं शिष्यचतुष्टयमतम् उद्धृत्य 'सर्वं शून्यं सर्वं शून्यम्' इत्युक्तिः व्याख्यायताम् । 20

Explain the statement – 'सर्वं शून्यं सर्वं शून्यम्', according to Buddhist philosophy, citing the views of the fourfold disciples.

**7.** (b) योगदर्शनानुसारं क्रियायोगः समुपवर्ण्यताम् । 15

Describe Kriyā-Yoga according to the Yoga philosophy.

**7.** (c) श्रीमद्भगवद्गीतानुसारं भक्तियोगस्य स्वरूपं सलक्षणं प्रतिपाद्यताम् । 15

Explain the nature of Bhakti-Yoga according to the Śrimad Bhagavad Gītā, along with its defining characteristics.

**8.** अधोलिखिताः सर्वे प्रश्नाः संस्कृतभाषया समाधेयाः : 25+25=50

Answer all of the following (to be written in Sanskrit Language) :

**8.** (a) अधोलिखितं सन्दर्भं सम्यग् अवधार्य तदधस्तात् पृष्टानां प्रश्नानाम् उत्तरं देवनागरीलिप्या स्वेन संस्कृतेन दीयताम् । प्रत्येकमुत्तरं 3-4 पंक्तिभिः भवेत् : 5×5=25

मानवानां जीवनंसाफल्यसिद्धये सकलश्रुतिस्मृतिप्रसिद्धाः धर्मार्थकाममोक्षाख्याः चत्वारः परमपुरुषार्थाः अनुष्ठेयत्वेन प्रतिपादिताः । तेषाम् अनुष्ठानम् आरोग्यं विना कदापि सुकरं न भवति । तत् आरोग्यं च युक्ताहारविहारं विना, कर्मसु युक्तचेष्टाम् अन्तरा, युक्तस्वप्नावबोधं चान्तरेण नावाप्तुं शक्यते । अतः आरोग्यसंरक्षणार्थं व्यायामः, प्राणायामः, यमनियमासनादयः योगाङ्गक्रियाकलापाश्च सर्वैरेव जनैः सदा अनुष्ठेयाः । यतः प्रोक्तं वर्तते -

व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम् ।
प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत् ॥

आरोग्यं विना धर्मः सम्यक्तया न परिपाल्यते। अर्थमपि सम्यग् उपार्जयितुं मनः न उत्सहते। दुर्बलाङ्गत्वात् अभिलाषा अपि न प्रपूर्यते। पुण्यैः प्राप्तस्य मानवजन्मनः वैफल्यं नाम दौर्भाग्यमयं कियत् कष्टं भविष्यति। तस्मात् आरोग्यरत्नमिदं सर्वैः बुद्धिमद्भिः सर्वतोभावेन रक्षणीयमेव। समे चत्वारः पुरुषार्थाः अपि एकेन आरोग्येन सर्वासु अवस्थासु संसाध्याः सन्ति। अतः तत्तत्साफल्यावाप्तये आरोग्यमेव एकमावश्यकं साधनं विद्यते विश्वजनानां कृते। स्वस्थे शरीरे एव विद्या अपि समुज्ज्वला तेजस्विनी च भवति। अस्वस्थे दुर्बले वपुषि च सा तेजोविहीना दीनहीनेव च प्रतिभाति। एवमेव गृहस्थसुखमपि पूर्णारोग्ययुक्तानां बलिष्ठानामेव यूनां युवतीनां च कृते सुकरं भवति, न तु रुग्णजीर्णशीर्णवपुष्मताम्।

प्रश्नाः -

(i) धर्मस्य आद्यं साधनं शरीरमेव कथम् ?

(ii) व्यायामस्य साफल्यार्थं यमनियमाचरणं कथमावश्यकम् ?

(iii) दुर्बलत्वात् मनोरथपूर्तिः कथं न भवति ?

(iv) स्वस्थं मनः कथं स्वस्थं वपुः पोषयति ?

(v) गृहस्थसुखार्थम् आरोग्यं कथमपेक्ष्यते ?

**8.** (b) अधोलिखितं सन्दर्भं सम्यग् अवधार्य तदधस्तात् पृष्टानां प्रश्नानामुत्तरं देवनागरीलिप्या स्वेन संस्कृतेन दीयताम्। प्रत्येकमुत्तरं 3-4 पंक्तिभिः भवेत् : 5×5=25

स्त्रीशिक्षायाः साम्प्रतं महती आवश्यकता अनुभूयते, यतो हि मातृशक्तेः प्रतीकभूताः स्त्रियः एव एताः सन्ति। शिक्षा पुण्यापुण्यविवेचनी शुभाशुभावबोधनी हिताहितनिदर्शनी कृत्याकृत्यनिर्देशनी, मनसः प्रसादयित्री च वर्तते। यथेयं शिक्षा नराणां हितसाधयित्री सुखसाधनभूता च विद्यते, तथैव स्त्रीणाम् कृतेऽपि अनिवार्या सुखशान्तिसाधिका समुन्नतिमूलिका च। यथा शिक्षामन्तरेण न पुरुषैः अभ्युदयावाप्तिः सुलभा सुकरा च भवति, तथैव स्त्रीणामपि कृते ज्ञेयम्। सद्गृहस्थ-सुरथस्य नरः नारी चेति द्वौ एतौ चक्रद्वयमस्ति। यथा एकेन चक्रेण रथस्य गतिः न सम्भवति, एवं सर्वार्थसाधिकां स्त्रियं विना गृहस्थरथस्य प्रगतिः सुकरा न। नरे विदुषि सत्यपि, यदि सहधर्मचारिणी सुशिक्षाभिः विहीना भवति, तर्हि सुखावहं दाम्पत्यं न। यतो हि द्वयोः एव गुणैः धर्मेण ज्ञानेन शीलेन सौजन्येन च गार्हस्थ्यं सुखम् अनुभूयते इत्यवगन्तव्यम्। यथा ज्ञानमन्तरा नरस्य समुन्नतिः दुर्लभा, तथैव स्त्रियोऽपि। निसर्गादेव एतासु शिशोः भरण-पोषणस्य, गृहसञ्चालनस्य गृहस्थजीवनाय सुखशान्तेश्च उत्तरदायित्वं भवति। शिक्षाम् अनासाद्य स्त्रीभिः स्वीयोत्तरदायित्वस्य परिपालनं कथमपि न सम्भाव्यते। शिक्षालाभाय च न केवलं विविधविषयग्रन्थानां परिशीलनम् एव पर्याप्तमस्ति, अपि तु व्यावहारिक-सामाजिकयोः विविधानां विद्यानां विज्ञानानां च परिज्ञानम् अपि तासां कृतेऽनिवार्यम्।

अतोऽनुभूयते सर्वत्र यत्, सुशिक्षितैव स्त्री सद्गृहिणी सती साध्वी सत्कर्मपरायणा वंशप्रतिष्ठास्वरूपा च भवितुमर्हति । उच्यते च -

'न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।'

प्रश्नाः -

(i) शिक्षया के सुपरिणामाः समुपलभ्यन्ते ?

(ii) समाजे गृहस्थरथः कथं प्रवर्तते ?

(iii) नारीशिक्षां संवर्धयितुं किमनुष्ठेयम् ?

(iv) सुशिक्षितैव स्त्री कथं सद्गृहिणीपदम् अवाप्तुमर्हति ?

(v) गृहसञ्चालने स्त्री कथं निसर्गपटुः भवति ?

---